

॥श्रीगणेशायनमः॥ अथगीतामाहात्म्यंलिख्यते॥ब्रह्मन्केनप्रकारेण सर्वपापक्षयोभवेत् विना
दानैर्विनायज्ञैर्विनातीर्थैर्विनामखैः १ विनादेवैर्विनाध्यानैर्विनाचेंद्रियनिग्रहैः विनाशास्त्रसमूहै
श्चकथंमुक्तिरवाप्यते २ सर्वकामफलावाप्तिकथंवासमवाप्यते कथमुत्पद्यतेभक्तिःकेशवेपापविस
र्वदा ३ निष्फलामुनिशार्दूलपुनर्जन्मनिजन्मनि स्मरणंदेवदेवस्यकथमत्रभवन्मुने ४ वेदशा
स्त्रार्थकुशलसर्वदाभगवंभवान् वेत्तात्वमितिहासानांसर्वज्ञोसिमहामुने ५ श्रीवेदव्यासउवाच॥क
थयामिमुनिश्रेष्ठयत्पृष्टोहमशेषतं कथयादेवदेवस्यनोज्ञातंममविद्यते ६ धनंजयाययत्प्रोक्तंदेवदे
वेनचक्रिणा सेनयोरुभयोर्मध्येकुरुक्षेत्रेमहात्मना ७ तच्छ्रुत्वातांमहाभागश्रोतव्यानामसंशयम् श्रव मु
णान्मुच्यतेजंतुर्दुःखसंसारसागरात ८ हरिर्यथादेवतानांद्विपदांब्राह्मणोवरः कपिलासर्वधेनूनां
औषधीनांयथायवाः ९ एकादशीतिथीनांचधर्मज्ञानांयथापतिः सर्वशास्त्रागमानांचतथागी १

ताश्च कीर्त्तिताः १० गीता सुगीता कर्त्तव्या किमन्यैः शास्त्रसंग्रहैः तुष्ट्यर्थं देवदेवस्य वासुदेवस्य चक्रि
णः ११ सर्वशास्त्रमयी गीता सर्ववेदमयो यतिः सर्वधर्ममयी यस्मात्तस्माद्गीता समभ्यसेत् १२ गीता
ध्ययनशीलस्य भक्तिपरस्य च हृद्देशेसमानस्य प्राप्यते परमं पदं १३ शालिग्रामशिलाग्रे तु गी
ताभ्यासं करोति यः मन्वंतरसहस्राणि वसति ब्रह्मणः पदं १४ हत्वापि त्वापयासर्वं मुक्त्वा सचराचरं
पापाद्यौ लिप्यते नैव गीताध्यायकथं चन १५ गीतां गायति यो नित्यं कपिलाश्वत्थसंनिधौ धात्रीछा
यां समाश्रित्य सर्वयज्ञफलं लभेत् १६ तेनेष्टं क्रतुभिः सर्वैः दत्तं तेन गवायुतं गीतामभ्यसते नित्यं तेना
प्तं परमव्ययं १७ नित्यं भागवतं शास्त्रं योधीते हरितत्परः तस्य श्रीर्विजयावाप्तिर्भक्तिर्भवति चाक्षया
१८ गीताध्यायं पठेद्यस्तु श्लोकार्द्धं श्लोकमेव च सर्वपापविनिर्मुक्तो याति ब्रह्मपरं पदं १९ अध्यायं पठे
द्यस्तु यो विष्णुपुरतः स्थितः गीताशास्त्रं हरेरिष्टं पुण्यपापैर्न लिप्यते २० यो नित्यं विश्वरूपाख्यमध्या

देव
गी०म० यंपठेतद्विजः विचितंदेवस्यपुण्यंतस्य वदाम्यहं २१ वेदैश्चीतैर्यत्पुन्यंमेतिहासैःपुराणकैः स्मो
२ कैकैनृतुतत्पुन्यंलभातेनात्रसंशयः २२ यःपठेद्विश्वरूपाख्यंयतीनांपुरतःस्थितः द्वादशपांजायतेविश्वे
ष्णास्यपुन्यंवदाम्यहं २३ लुप्तपिंडक्रियायेकेचित्पुत्रदारविवर्जिताः तेसर्वेमुक्तिमायांतिकुलेतस्यन
ताम्बये २४ आब्रह्मलोकपर्यंतंजगतृप्तिंकरोतिच विश्वरूपंसदाध्यायंविभूत्यंयःपठेद्विजः २५
गंगागीताचगायत्रीगोविंदोयस्यचेतसि सगच्छत्परमंस्थानंतेजोमूर्तिर्ननाशयं २६ गीतायाःश्लोकपा
देनगोविंदेतिचकीर्तिना यतिदर्शनमात्रेणतीर्थकोटिफलंलभेत् २७ योगीतेस्सकलागीतांमानवोमुनि
सत्तम द्वादशपांजायते रात्रोपरंपरमाधिगच्छति २८ अहन्यहनियोमर्त्योगीताध्यायंपठेद्विजः
द्वात्रिंशादपराधैस्तुअहन्यहनिमुच्यते २९ जागरेपद्मनाभस्यमन्वादिषुयुगादिषु गीताशास्त्रंतुयो
धीतेश्रृणुतेविष्णुतत्परः ३० लिखित्वाधारयेद्वस्तुनित्यमर्चतिभक्तितः योददातियतीनांतुपुन्यसंख्या

वदाम्यहं ३१ सहस्रमश्वमेधानां विधिवत्कुरुते च यः तत्फलं लभते विप्रः ब्रह्महत्यायुतं हि च ३२ गीता
याक्षराणि यस्यास्ये न संपरिवर्तते तस्यैव वस्तुतोग्रा जा कुरुते लिपिमाजीवं ३३ चांद्रायणसहस्रेण पारकानां
शतेन च भगवच्छास्त्रपाठानां लभते च ततोधिकं ३४ श्रो। चीर्णानां चाधिकं प्रोक्तं फलं लभेत् न संशयः तस्मा
त्सर्वप्रयत्नेन मनो गीतासु योजयेत् ३५ अहर्निशं हरेर्भक्त्या गीतामभ्यसते नरः न लिप्यते महापापैः स
जीवन्मुक्तो भवेद्यदि ३७ त्रिविधानां वैष्णवानां तु गीताशास्त्रं प्रयच्छति दिने दिनेश्वमेधानां यजनं तेनात्र
संशयः ३८ यत्किंचित्कुरुते पुण्यं गीतालीलादिने दिने गीताशास्त्रप्रसादेन भवेत्पुण्यं शताधिकं ३९ च
तुर्णामपि वेदानां सारमुद्धृत्य विष्णुना त्रैलोक्यस्योपकाराय गीताशास्त्रमुदाहृतं ४० गंगागीता तथा भि
क्षुः कपिलाश्वत्थसेवनं वासनं पद्मनाभस्य सप्तमं कलौ युगे ४१ विष्णुशास्त्रप्रवक्ता यो नास्ति तस्मा
त्परो गुरुः यस्य शास्त्रप्रदीयंते नश्यते नारकं तमः ४२ विष्णुशास्त्रप्रवक्तृत्वान्नान्यो बंधुर्भवेद्भुवि य

गी.फ. स्मायदेशदीपेनदृश्यतेपरमंपदं ४३ जन्मांतरसहस्रेणविष्णुभक्तोनलभ्यते यस्यसंदर्शनादेवभ
३ स्मीभवतिपातकं ४४ यथोदितेरविर्भातिघृतथाक्तोयथानलः पितृमातृरतोपुत्रोगीताध्यायंतथानरः
४५ यथास्तमसतोयानांनिर्मलंजाह्नवीजलं विशल्याद्यादृश्मीयद्वत्गीताध्यायीतथानरः ४६ यथा
भागवतालोके यथानारीपतिव्रता भातिलोके,तथागीताभातिगीतातथाभुवि ४७ इतिगीताफलस्तुतिः।

॥शुभंभूयात्॥ ॥श्री॥ ३